# Pushpadantavirachitam Shivamahimna Stotram

# પુષ્પદન્તવિરચિતં શ્રીશિવમહિમ્નસ્તોત્રમ્

## Document Information

Text title : shivamahimnastotra (text)

File name : shivamahi.itx

Category : shiva, stotra, puShpadanta, shivarahasya, mahimna

Location : doc_shiva

Author : Pushhpadanta

Transliterated by : Devendraray V . Bhatt and S. V. Ganesan

Proofread by : S. V. Ganesan, Ruma Dewan

Translated by : Translation in shivamahimean file

Description-comments : Stotra updated from text from Shivarahasya

Latest update : March 23, 2004, April 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

March 29, 2025

*sanskritdocuments.org*

# પુષ્પદન્તવિરચિતં શ્રીશિવમહિમ્નસ્તોત્રમ્

॥ ૐ નમઃ શિવાય ॥

॥ અથ શ્રી શિવમહિમ્નસ્તોત્રમ્ ॥

મહિમ્નઃ પારં તે પરમવિદુષો યદ્યસદૃશી
સ્તુતિર્બ્રહ્માદીનામપિ તદવસન્નાસ્ત્વયિ ગિરઃ ।
અથાવાચ્યઃ સર્વઃ સ્વમતિપરિણામાવધિ ગૃણન્
મમાપ્યેષ સ્તોત્રે હર નિરપવાદઃ પરિકરઃ ॥ ૧॥

અતીતઃ પન્થાનં તવ ચ મહિમા વાઙ્મનસયોઃ
અતદ્વ્યાવૃત્ત્યા યં ચકિતમભિધત્તે શ્રુતિરપિ ।
સ કસ્ય સ્તોતવ્યઃ કતિવિધગુણઃ કસ્ય વિષયઃ
પદે ત્વર્વાચીને પતતિ ન મનઃ કસ્ય ન વચઃ ॥ ૨॥

મધુસ્ફીતા વાચઃ પરમમમૃતં નિર્મિતવતઃ
તવ બ્રહ્મન્ કિં વાગપિ સુરગુરોર્વિસ્મયપદમ્ ।
મમ ત્વેતાં વાણીં ગુણકથનપુણ્યેન ભવતઃ
પુનામીત્યર્થેઽસ્મિન્ પુરમથન બુદ્ધિર્વ્યવસિતા ॥ ૩॥

તવૈશ્વર્યં યત્તજ્જગદુદયરક્ષાપ્રલયકૃત્
ત્રયીવસ્તુ વ્યસ્તં તિસૃષુ ગુણભિન્નાસુ તનુષુ ।
અભવ્યાનામસ્મિન્વરદ રમણીયામરમણીં
વિહન્તું વ્યાક્રોશીં વિદધત ઇહૈકે જડધિયઃ ॥ ૪॥

કિમીહઃ કિંકાયઃ સ ખલુ કિમુપાયસ્ત્રિભુવનં
કિમાધારો ધાતા સૃજતિ કિમુપાદાન ઇતિ ચ ।
અતર્ક્યૈશ્વર્યે ત્વય્યનવસર દુઃસ્થો હતધિયઃ
કુતર્કોઽયં કાંશ્ચિન્મુખરયતિ મોહાય જગતામ્ (જગતઃ) ॥ ૫॥

અજન્માનો લોકાઃ કિમવયવવન્તોઽપિ જગતાં

અધિષ્ઠાતારં કિં ભવવિધિરનાદૃત્ય ભવતિ ।
અનીશો વા કુર્યાદ્ભુવનજનને કઃ પરિકરો
યતો મન્દાસ્ત્વાં પ્રત્યમરવર સંશેરત ઇમે ॥ ૬॥

ત્રયી સાઙ્ખ્યં યોગઃ પશુપતિમતં વૈષ્ણવમિતિ
પ્રભિન્ને પ્રસ્થાને પરમિદમદઃ પથ્યમિતિ ચ ।
રુચીનાં વૈચિત્ર્યાદૃજુકુટિલ નાનાપથજુષાં
નૃણામેકો ગમ્યસ્ત્વમસિ પયસામર્ણવ ઇવ ॥ ૭॥

મહોક્ષઃ ખટ્વાઙ્ગં પરશુરજિનં ભસ્મ ફણિનઃ
કપાલં ચેતીયત્તવ વરદ તન્ત્રોપકરણમ્ ।
સુરાસ્તાં તામૃદ્ધિં દધતિ તુ ભવદ્ભૂપ્રણિહિતાં
ન હિ સ્વાત્મારામં વિષયમૃગતૃષ્ણા ભ્રમયતિ ॥ ૮॥

ધ્રુવં કશ્ચિદ્બ્રૂતે સકલમપરસ્ત્વં ધ્રુવમિતિ
(ધ્રુવં કશ્ચિત્સર્વં સકલમપરસ્ત્વધ્રુવમિદં)
પરો ધ્રૌવ્યાધ્રૌવ્યે જગતિ ગદતિ વ્યસ્તવિષયે ।
સમસ્તેઽપ્યેતસ્મિન્પુરમથન તૈર્વિસ્મિત ઇવ
સ્તુવન્જિહ્રેમિ ત્વાં ન ખલુ નનુ ધૃષ્ટા મુખરતા ॥ ૯॥

ત્વાત્માનં (તવૈશ્ચર્યં) યત્નાદ્યદુપરિ વિરિઞ્ચિર્હરિરધઃ (વિરિઞ્ચો હરિરધઃ)
પરિચ્છેત્તું યાતાવનિલમનલ સ્કન્ધવપુષઃ । (યાતાવનિલમનલ) (સ્તમ્ભવપુષઃ)
તતો ભક્તિશ્રદ્ધાભરગુરુગૃણદ્ભ્યાં ગિરિશ યત્
સ્વયં તસ્થે તાભ્યાં ત્વયિ (તવ) કિમનુવૃત્તિર્ન ફલતિ ॥ ૧૦॥

અયત્નાદાપાદ્ય (અયત્નાદાસાદ્ય) ત્રિભુવનમવૈરવ્યતિકરં
દશાસ્યો યદ્બાહૂનભૃત રણકણ્ડૂપરવશાન્ ।
શિરઃપદ્મશ્રેણીરચિતચરણામ્ભોરુહબલેઃ
સ્થિરાયાસ્ત્વદ્ભક્તેસ્ત્રિપુરહર વિસ્ફૂર્જિતમિદમ્ ॥ ૧૧॥

અમુષ્ય ત્વત્સેવાસમધિગતસારં ભુજવનં
બલાત્કૈલાસેઽપિ ત્વદધિવસતૌ વિક્રમયતઃ ।
અલભ્યા પાતાલેઽપ્યલસચલિતાઙ્ગુષ્ઠશિરસિ
પ્રતિષ્ઠા ત્વય્યાસીદ્ધ્રુવમુપચિતો મુહ્યતિ ખલઃ ॥ ૧૨॥

યદઙ્ધ્રિં (યદૃદ્ધિં) સુત્રામ્ણો વરદ પરમોચ્ચૈરપિ સતીં
અધશ્ચક્રે બાણઃ પરિજનવિધેયસ્ત્રિભુવનઃ (પરિજનવિધેયત્રિભુવનઃ) ।

ન તચ્ચિત્રં તસ્મિન્વરિવસિતરિ ત્વચ્ચરણયોઃ
ન કસ્યાપ્યુન્નત્યૈ ભવતિ શિરસસ્ત્વય્યવનતિઃ (શિરસિત્વય્યવનતિઃ) ॥ ૧૩॥

અકાણ્ડબ્રહ્માણ્ડક્ષયચકિતદેવાસુરકૃપા
વિધેયસ્યાઽઽસીદ્યસ્ત્રિનયન વિષં સંહૃતવતઃ ।
સ કલ્માષઃ કણ્ઠે તવ ન કુરુતે ન શ્રિયમહો
વિકારોઽપિ શ્લાઘ્યો ભુવનભયભઙ્ગવ્યસનિનઃ ॥ ૧૪॥

અસિદ્ધાર્થા નૈવ ક્વચિદપિ સદેવાસુરનરે
નિવર્તન્તે નિત્યં જગતિ જયિનો યસ્ય વિશિખાઃ ।
સ પશ્યન્નીશ ત્વામિતરસુરસાધારણમભૂત્
સ્મરઃ સ્મર્તવ્યાત્મા ન હિ વશિષુ પથ્યઃ પરિભવઃ ॥ ૧૫॥

મહી પાદાઘાતાદ્વ્રજતિ સહસા સંશયપદં
પદં વિષ્ણોર્ભ્રામ્યદ્ભુજપરિઘરુગ્ણ ગ્રહગણમ્ ।
મુહુર્દ્યૌર્દૌસ્થ્યં યાત્યનિભૃત જટાતાડિત તટા
જગદ્રક્ષાયૈ ત્વં નટસિ નનુ વામૈવ વિભુતા ॥ ૧૬॥

વિયદ્વ્યાપી તારાગણગુણિતફેનોદ્ગમરુચિઃ
પ્રવાહો વારાં યઃ પૃષતલઘુદૃષ્ટઃ શિરસિ તે ।
જગદ્વીપાકારં જલધિવલયં તેન કૃતમિતિ
અનેનૈવોન્નેયં ધૃતમહિમ દિવ્યં તવ વપુઃ ॥ ૧૭॥

રથઃ ક્ષોણી યન્તા શતધૃતિરગેન્દ્રો ધનુરથો
રથાઙ્ગે ચન્દ્રાર્કૌ રથચરણપાણિઃ શર ઇતિ ।
દિધક્ષોસ્તે કોઽયં ત્રિપુરતૃણમાડમ્બર વિધિઃ
વિધેયૈઃ ક્રીડન્ત્યો ન ખલુ પરતન્ત્રાઃ પ્રભુધિયઃ ॥ ૧૮॥

હરિસ્તે સાહસ્રં કમલબલિમાધાય પદયોઃ
યદેકોને તસ્મિન્ નિજમુદહરન્નેત્રકમલમ્ ।
ગતો ભક્ત્યુદ્રેકઃ પરિણતિમસૌ ચક્ર વપુષા (ચક્રવપુષઃ)
ત્રયાણાં રક્ષાયૈ ત્રિપુરહર જાગર્તિ જગતામ્ ॥ ૧૯॥

ક્રતૌ સુપ્તે જાગ્રત્ત્વમસિ ફલયોગે ક્રતુમતાં
ક્વ કર્મપ્રધ્વસ્તં ફલતિ પુરુષારાધનમૃતે ।
અતસ્ત્વાં સમ્પ્રેક્ષ્ય ક્રતુષુ ફલદાન પ્રતિભુવં
શ્રુતૌ શ્રદ્ધાં બધ્દ્વા (બદ્ધ્વા) દૃઢપરિકરઃ કર્મસુ જનઃ ॥ ૨૦॥

ક્રિયાદક્ષો દક્ષઃ ક્રતુપતિરધીશસ્તનુભૃતાં
ઋષીણામાર્ત્વિજ્યં શરણદ સદસ્યાઃ સુરગણાઃ ।
ક્રતુભ્રેષસ્ત્વત્તઃ (ક્રતુભ્રંશસ્ત્વત્તઃ) ક્રતુફલવિધાન વ્યસનિનઃ
ધ્રુવં કર્તું શ્રદ્ધા વિધુરમભિચારાય હિ મખાઃ ॥ ૨૧॥

સતાંવર્ત્મત્યક્ત્વા શ્રુતિસમધિગમ્યં સહભુવં
ઘૃણામપ્યુન્મૂલ્ય સ્વજનવિષયસ્નેહ ગુણિતામ્ ।
દ્વિજઃ કૃન્તન્પાદે પિતરમપરાદ્ધં ત્વયિ વિભો
મનુષ્યત્વં સદ્યસ્ત્રિદશ પરિણામેન વિજહૌ ॥ ૨૨॥

પ્રજાનાથં નાથ પ્રસભમભિકં સ્વાં દુહિતરં
ગતં રોહિદ્ભૂતાં રિરમયિષુમૃષ્યસ્ય વપુષા ।
ધનુષ્પાણેર્યાતં દિવમપિ સપત્રાકૃતમમું
ત્રસન્તં તેઽદ્યાપિ ત્યજતિ ન મૃગવ્યાધરભસઃ ॥ ૨૩/૨૨॥

સ્વલાવણ્યાશંસા ધૃતધનુષમહ્નાય તૃણવત્
પુરઃ પ્લુષ્ટં દૃષ્ટ્વા પુરમથન પુષ્પાયુધમપિ ।
યદિસ્ત્રૈણં દેવી યમનિરતદેહાર્ધ ઘટનાત્
અવૈતિ ત્વામદ્ધા બત વરદ મુગ્ધા યુવતયઃ ॥ ૨૪/૨૩॥

શ્મશાનેષ્વાક્રીડા સ્મરહર પિશાચાઃ સહચરાઃ
ચિતાભસ્માલેપઃ સ્રગપિ નૃકરોટીપરિકરઃ ।
અમઙ્ગલ્યં શીલં તવ ભવતુ નામૈવમખિલં
તથાપિ સ્મર્તૃણાં વરદ પરમં મઙ્ગલમસિ ॥ ૨૫/૨૪॥

મનઃ પ્રત્યક્ચિત્તે સવિધમવિધાયાત્તમરુતઃ
પ્રહૃષ્યદ્રોમાણઃ પ્રમદસલિલોત્સઙ્ગતિદૃશઃ ।
યદાલોક્યાહ્લાદં હ્રદ ઇવ નિમજ્યામૃતમયે
દધત્યન્તસ્તત્ત્વં કિમપિ યમિનસ્તત્કિલ ભવાન્ ॥ ૨૬/૨૫॥

ત્વમર્કસ્ત્વં સોમસ્ત્વમસિ પવનસ્ત્વં હુતવહઃ
ત્વમાપસ્ત્વં વ્યોમ ત્વમુ ધરણિરાત્મા ત્વમિતિ ચ ।
પરિચ્છિન્નામેવં ત્વયિ પરિણતા બિભ્રતિ ગિરં
ન વિદ્મસ્તત્તત્ત્વં વયમિહ તુ યત્ત્વં ન ભવસિ ॥ ૨૭/૨૬॥

ત્રયીં તિસ્રો વૃત્તીસ્ત્રિભુવનમથો ત્રીનપિ સુરાન્

અકારાદ્યૈર્વર્ણૈસ્ત્રિભિરભિદધત્તીર્ણ વિકૃતિ ।
તુરીયં તે ધામ ધ્વનિભિરવરુન્ધાનમણુભિઃ
સમસ્તં(સ્ત) વ્યસ્તં ત્વાં શરણદ ગૃણાત્યોમિતિ પદમ્ ॥ ૨૮/૨૭॥

ભવઃ શર્વો રુદ્રઃ પશુપતિરથોગ્રઃ સ ચ મહાંસ્ (સહમહાન્)
તથા ભીમેશાનાવિતિ યદભિધાનાષ્ટકમિદમ્ ।
અમુષ્મિન્પ્રત્યેકં પ્રવિચરતિ દેવ શ્રુતિરપિ
પ્રિયાયાસ્મૈધામ્ને પ્રણિહિતનમસ્યોઽસ્મિ ભવતે ॥ ૨૯/૨૮॥

નમો નેદિષ્ઠાય પ્રિય વરદવિષ્ઠાય ચ નમઃ
(નમો નેદિષ્ઠાય પ્રિયદવ દવિષ્ઠાય ચ નમઃ)
નમઃ ક્ષોદિષ્ઠાય સ્મરહર મહિષ્ઠાય ચ નમઃ ।
નમો વર્ષિષ્ઠાય ત્રિનયન યવિષ્ઠાય ચ નમઃ
નમઃ સર્વસ્મૈ તે તદિદમતિસર્વાય ચ નમઃ ॥ ૩૦/૨૯॥

બહુલરજસે વિશ્વોત્પત્તૌ ભવાય નમો નમઃ
જનસુખકૃતે સત્ત્વોદ્રિક્તૌ મૃડાય નમો નમઃ ।
પ્રબલતમસે તત્સંહારે હરાય નમો નમઃ
પ્રમહસિ પદે નિસ્ત્રૈગુણ્યે શિવાય નમો નમઃ ॥ ૩૧/૩૦॥

કૃશપરિણતિચેતઃ ક્લેશવશ્યં ક્વચેદં
ક્વ ચ તવ ગુણસીમોલ્લઙ્ઘિની શશ્વદૃદ્ધિઃ ।
ઇતિ ચકિતમમન્દીકૃત્ય માં ભક્તિરાધાત્
વરદ ચરણયોસ્તે વાક્યપુષ્પોપહારમ્ ॥ ૩૨/૩૧॥

વપુઃ પ્રાદુર્ભાવાદનુતમિતદં જન્મનિ પુરા
પુરારે નક્વાપિ ક્ષણમપિ ભવન્તં પ્રણતવાન્ ।
નમન્મુક્તઃ સમ્પ્રત્યહમલનુરગ્રેઽપ્યનતિમા
નિતીશ ક્ષન્તવ્યં તદિદમપરાધદ્વયમપિ ॥ ૩૩॥

અસિતગિરિસમં સ્યાત્કજ્જલં સિન્ધુપાત્રે
સુરતરુવરશાખા લેખની પત્રમુર્વી ।
યદિ લિખતિ ગૃહીત્વા શારદા સર્વકાલં
તદપિ તવ ગુણાનામીશ પારં ન યાતિ ॥ ૩૪/૩૨॥

અસુરસુરમુનીન્દ્રૈરર્ચિતસ્યેન્દુમૌલેઃ
ગ્રથિતગુણમહિમ્નો નિર્ગુણસ્યેશ્વરસ્ય ।

સકલગુણ(ગણ)વરિષ્ઠઃ પુષ્પદન્તાભિધાનઃ
રુચિરમલઘુવૃત્તં(ત્તૈઃ) સ્તોત્રમેતચ્ચકાર ॥ ૩૫/૩૩ ॥

અહરહરનવદ્યં ધૂર્જટેઃ સ્તોત્રમેતત્
પઠતિ પરમભક્ત્યા શુદ્ધચિત્તઃ પુમાન્યઃ ।
સ ભવતિ શિવલોકે રુદ્રતુલ્યસ્તથાત્ર
પ્રચુરતરધનાયુઃ પુત્રવાન્કીર્તિમાંશ્ચ ॥ ૩૬/૩૪ ॥

મહેશાન્નાપરો દેવો મહિમ્નો નાપરા સ્તુતિઃ ।
અઘોરાન્નાપરો મન્ત્રો નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૩૭/૩૫ ॥

ફલમ્ -
દીક્ષા દાનં તપસ્તીર્થં જ્ઞાનં (સ્નાનં) યાગાદિકાઃ ક્રિયાઃ ।
મહિમ્નઃસ્તવપાઠસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૩૬ ॥

કુસુમદશનનામા સર્વગન્ધર્વરાજઃ
શશિધરવરમૌલેર્દેવદેવસ્ય દાસઃ ।
સ ખલુ નિજમહિમ્નો ભ્રષ્ટ એવાસ્ય રોષાત્
સ્તવનમિદમકાર્ષીદ્દિવ્યદિવ્યં મહિમ્નઃ ॥ ૩૭ ॥

સુરવરમુનિપૂજ્યં સ્વર્ગમોક્ષૈકહેતું
પઠતિ યદિ મનુષ્યઃ પ્રાઞ્જલિર્નાન્યચેતાઃ ।
વ્રજતિ શિવસમીપં કિન્નરૈઃ સ્તૂયમાનઃ
સ્તવનમિદમમોઘં પુષ્પદન્તપ્રણીતમ્ ॥ ૩૮ ॥

આસમાપ્તમિદં સ્તોત્રં પુણ્યં ગન્ધર્વભાષિતમ્ ।
અનૌપમ્યં મનોહારિ શિવમીશ્વરવર્ણનમ્ ॥ ૩૯ ॥

ઇત્યેષા વાઙ્મયી પૂજા શ્રીમચ્છઙ્કરપાદયોઃ ।
અર્પિતા તેન દેવેશઃ પ્રીયતાં મે સદાશિવઃ ॥ ૪૦ ॥

તવ તત્ત્વં ન જાનામિ કીદૃશોઽસિ મહેશ્વર ।
યાદૃશોઽસિ મહાદેવ તાદૃશાય નમો નમઃ ॥ ૪૧ ॥

એકકાલં દ્વિકાલં વા ત્રિકાલં યઃ પઠેન્નરઃ ।
સર્વપાપવિનિર્મુક્તઃ શિવલોકે મહીયતે ॥ ૪૨ ॥

શ્રી પુષ્પદન્તમુખપઙ્કજનિર્ગતેન
સ્તોત્રેણ કિલ્બિષહરેણ હરપ્રિયેણ ।

કણ્ઠસ્થિતેન પઠિતેન સમાહિતેન
સુપ્રીણિતો ભવતિ ભૂતપતિર્મહેશઃ ॥ ૪૩॥

॥ ઇતિ શ્રીપુષ્પદન્તવિરચિતં શિવમહિમ્નસ્તોત્રં સમ્પૂર્ણમ્ ॥

Notes:

The Core Stotram is found in ŚivaRahasyam, Ugrākhyaḥ Saptamāṃśaḥ, Adhyāyaḥ 13, ślokaḥ 241-277 (શિવરહસ્યમ્ . ઉગ્રાખ્યઃ સપ્તમાંશઃ . અધ્યાયઃ ૧૩ . શ્લોકાઃ ૨૪૧-૨૭૭).

Phalaśruti ફલશ્રુતિ is found in prevalent versions of the Stotram in many publications.

śloka-s from ŚivaRahasyam have been renumbered and given as preceding the numbering that is seen as followed in the prevalent versions.

Core Stotram in ŚivaRahasyam has two śloka-s more than the prevalent versions; viz, śloka number 22 (સતાંવર્ત્મત્યક્ત્વા) and 33 (વપુઃ પ્રાદુર્ભાવાદનુતમિતદં)

Three additional śloka-s are found in as beginning of the Stotram in the publication “Stotra Pāṭha Saṅgraha સ્તોત્ર પાઠ સઙ્ગ્રહ”.

ૐ નમઃ શિવાય ।
આધીનામગદં દિવ્યં વ્યાધીનાં મૂલકૃન્તનમ્ ।
ઉપદ્રાવાણાં દલનં મહાદેવમુપાસ્મહે ॥ ૧॥

અહં પાપી પાપક્ષપણ નિપૂણાઃ શઙ્કર ભવાન્ ।
અહં ભીતો ભીતાભયવિતરણે તે વ્યસનિતા
અહં દીનો દીનોદ્ધરણ વિધિસજ્જસ્ત્વદિતરત્
ન જાનેઽહં વક્તું કુરુ સકલ શોચ્યે મયિ કૃપામ્ ॥ ૨॥

જનસ્ત્વદપાદાબ્જશ્રવણમનનધ્યાનનિપુણાઃ
સ્વયં તે વિસ્તીર્ણા ન ખલુ કરુણા તેષુ કરણા ।
ભવે લીને દીને મયિ મનનહીને ન કરુણા
કથં નાથ ખ્યાતસ્ત્વમસિ કરુણાગાર સાગર ઇતિ ॥ ૩॥

ૐ મહિમ્નઃ પારં તે ....

The publication named શિવરાત્રિ પૂજા મહિમ્નસ્તોત્ર સહિત; and the śloka number 30 (given below) is a variation of śloka renumbered as 33 from ŚivaRahasyam. Pages after śloka 35 seem to be missing in the scan.

વપુષ્પ્રાદુર્ભાવાદનુતમિતદં જન્મનિ પુરા
પુરારે ! નૈવાહં ક્વચિદપિ ભવન્તં પ્રણતવાન્ ।

નમન્મુક્તઃ સમ્પ્રત્યતનુરહમગ્રેપ્યનતિમાન્
મહેશ ! ક્ષન્તવ્યં તદિદમપરાધદ્વયમપિ ॥ ૩૦॥

Encoded by Devendraray V . Bhatt and S. V. Ganesan
Proofread by S. V. Ganesan, Ruma Dewan

*Pushpadantavirachitam Shivamahimna Stotram*
pdf was typeset on March 29, 2025

Please send corrections to *sanskrit@cheerful.com*